१. "वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।"

वाक् नाम शब्दः। शब्दार्थयोः नित्यसम्बन्धोऽस्ति। एतादृशः नित्यसम्बन्धः विषयान् सम्यक् प्रकाशयितुं शक्नोति। शब्दः श्रवणेन गृह्यते। ततः परम् अर्थः मनसा अर्थान् बुद्ध्या गृह्यते। कविकुलगुरुः कालिदासः ग्रन्थस्य निर्विघ्नेन परिसमाप्त्यर्थं समासिकामो मङ्गलमाचरेत् इति सम्प्रदायम् अनुसृत्य ग्रन्थस्य आदौ अभीष्टदेवयोः पार्वतीपरमेश्वरयोः वन्दनरूपं मङ्गलम् आचरितवान्। अत्र पार्वतीपरमेश्वरयोः यथा अभेदसम्बन्धः तथैव शब्दार्थयोः नित्यः सम्बन्धः। जगतः माता पार्वती महेश्वरः च शिवः अर्धनारीश्वररूपेण अभेदसम्बन्धेन स्थितो भवति। तयोः पार्वतीपरमेश्वरयोः अभेदसम्बन्धं प्रकाशयितुं कविना कालिदासेन नित्यसम्बन्धयुक्तयोः शब्दार्थयोः उपमा प्रदत्ता वर्तते।

२. "तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।"

अनन्तजलराशिसम्पन्नः विस्तृतोऽयं सागरः। महार्णवस्य अतिक्रमणे बृहच्छक्तिमतः जलयानस्य अपेक्षा भवति। कोऽपि मोहग्रस्तः जनः कामनावशात् क्षुद्रभेलया विस्तृतम् अर्णवम् अतिक्रमितुम् इच्छति चेत् मोहयुक्तस्य तस्य प्रयत्नःव्यर्थः भवति। पुनश्चात्र सागरशब्दस्य अन्योऽर्थः भवति यत् सगरवंशः इति। सूर्यात् जातः वंशः सगरवंशः भवति। जगज्ज्ञातस्य गौरवान्वितस्य अस्य वंशस्य व्याख्याने मोहलोभादिकारणात् कालिदासः प्रवृत्तोऽभवत्। स्वाहंकारं त्यक्त्वा सूर्यवंशस्य माहात्म्यं वर्णयितुं कवेः प्रयासः उपहास्यतां यास्यति।

३. "प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः।"

वृक्षस्य उच्चैः यानि फलानि सन्ति, तानि दीर्घबाहुयुक्तेन शक्तिमता पुरुषेण प्राप्यन्ते। उच्चैः स्थितानि फलानि वामनपुरुषेण नैव प्राप्यन्ते। सूर्यवंशः महद्वंशो भवति। अस्य सूर्यवंशस्य माहात्म्यं येन केनापि वर्णयितुं न शक्यते। पूर्वं वाल्मीकिप्रभृतयः महाकवयः अस्य सूर्यवंशस्य वर्णनाम् अकुर्वन्। तेषां वर्णनात् ईक्ष्वाकूणां राज्ञां चरितकथाम् अवगम्य कालिदासः स्वयमेव तेषां राज्ञां माहात्म्यवर्णने प्रयासी अभवत्। पूर्वं महाकवयः रघुवंशस्य माहात्म्यं वर्णयित्वा साफल्यं प्राप्तवन्तः। किन्तु कालिदासः तद्वंशमाहात्म्यं वर्णयित्वा साफल्यं प्राप्स्यति न वेति आशंका। कालिदासस्य माहात्म्यवर्णनरूपोऽयं प्रयासः प्रांशुलभ्ये फले उद्बाहुर्वामन इव प्रतीयते।

४. "मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः।"

मालाग्रथनात् पूर्वं सूच्यादिना रत्नेषु रन्ध्रः क्रियते। रन्ध्रेषु सूत्रं प्रवेशयित्वा सूत्रे र ग्रथ्यते। ततः परं माला सम्पूर्णा भवति। किन्तु रन्ध्रहीनेषु रत्नेषु सूत्रस्य प्रवेशः असम्भ भवति। यस्मात् पूर्वकवयः सूर्यवंशस्य माहात्म्यं वर्णितवन्तः, तस्मात् तेषां वर्ण अनुप्राणितः कालिदासः रघुवंशस्य माहात्म्यवर्णने प्रयासी अभवत्। कविः कालिदा

वाल्मीकिप्रभृतीनां कवीनां वंशेषु उत्पन्नोऽभवत्। वाल्मीकिप्रभृतिभिः निर्मिते काव्यमार्गे कालिदासस्यापि प्रवेशाधिकारो विद्यते। यतो हि निर्मिते काव्यमार्गे प्रवेशः सुकरो भवति, न तु अनिर्मिते। अतः पूर्वजकवीन् अनुसृत्य रघुवंशीयानां राज्ञां माहात्म्यवर्णने प्रवृत्तस्य कालिदासस्य प्रयासः सफलो भविष्यति इति कालिदासस्य आशा।

५. "मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।"

मन्दबुद्धिसम्पन्नम् उपहासपात्रम् इव मन्यते। यद्यपि रघुवंशीयानां राज्ञां माहात्म्यं वाचा वक्तुम् अयोग्यं तथापि यशःप्राप्त्यर्थं कविः तेषां राज्ञां माहात्म्यवर्णने प्रवृत्तोऽभवत्। महाकवेः ख्यातिलाभार्थं कविः उच्चतमकल्पनायाम् अधिकारी भवेत्। तादृशी उन्नता कल्पना कवेः नास्ति इति कारणात् कविः स्वम् उपहासपात्रमिव मन्यते। यथा – वामनः जनः उच्चैः स्थितं फलं प्राप्तुं न शक्नोति। एवं च वामनेन विहितः प्रयासः व्यर्थः एव भवति। तथैव कविरपि माहात्म्यवर्णने प्रवृत्तः इति कारणात् कवेः प्रयासः उपहास्यतां गमिष्यति। अनेन कविः अहङ्काररहितः इति स्पष्टमवगम्यते। अहङ्काररहितः सन् कार्यं क्रियते चेत् तत्कार्यसफलतां प्राप्स्यतीति कारणात् कविना प्रणीतमिदं रघुवंशम् अद्यापि अस्मद्हृदि विद्यते।

६. "हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा।"

वस्तुतः धनं कन्यां वा सर्वदा यथा सत्पात्रे देयम्, असत्पात्रेऽदेयं भवति, तथैव योग्यश्रोतुः कृते कविः काव्यं प्रणेति। अयोग्यानां कृते काव्यं श्राव्यते चेत् काव्यमर्यादायाः हानिः भवति। अतः समालोचकाः कथयन्ति यत्-

"इतस्तापशतानि यथेच्छया वितर तानि सहे चतुरानन।
अरसिकेषु रसस्य निवेदनं शिरसि मा लिख, मा-लिख, मा लिख"इति।

सुवर्णस्य शुद्धता अग्निना परीक्ष्यते। तथैव दोषगुणादयः सहृदयैः परीक्ष्यन्ते। महाकविः कालिदासः रघुवंशनामकं महाकाव्यं प्रणीतवान्। तेन प्रणीतं रघुवंशकाव्यं सफलं वा विफलं वेति परीक्षितुं सहृदयाः एव शक्नुवन्ति। अर्थात् सहृदयाः एव परीक्षणे अधिकारिणः भवन्ति। यतो हि कविः मन्यते यत् – "आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्" इति। अतः कविः स्वप्रणीतस्य काव्यस्य परीक्षणार्थं सहृदयान् प्रार्थयति।